इस मन्त्र के उच्चारण से 'शर्करा-स्नान' करायें ।

गुड-स्नान-मन्त्र—

"सर्व्वमाधुर्य्यताहेतुस्वादुस्सर्व्वप्रियङ्करः ।
पुष्टिकृत्स्नातुमानीत इक्षुसारभवो गुडः ॥"

इस मन्त्र के उच्चारण से 'गुड़-स्नान' करायें ।

मधुपर्क-मंत्र—

"कांस्ये कांस्येन पिहितो दधिमध्वाज्यपूरितः ।
मधुपर्क्को मयानीतः पूजार्त्थम्प्रतिगृह्यताम् ॥"

इस मन्त्र के उच्चारण से 'मधु-पर्क' प्रदान करें ।

शुद्धोदक-स्नान-मंत्र—

"सर्व्वतीर्त्थाद्धृतन्तोयम्मया प्रार्त्थनया विभो ।
सुवासितङ् गृहाणेदं सम्यक् स्नातुं सुरेश्वर ॥"

इस मंत्र के उच्चारण से शुद्धोदक-स्नान करायें ।

वस्त्र-मंत्र —

"रक्तवस्त्रयुगन्देव लोकलज्जानिवारणम् ।
अनर्घ्यमतिसूक्ष्मञ्च गृहाणेदम्मयार्पितम् ॥"

यज्ञोपवीत-मंत्र—

"राजतम्ब्रह्मसूत्रञ्च काञ्चनं रक्तसंय्युतम् ।
भक्त्या मयार्पितं देव गृहाण परमेश्वर ।"

इस मंत्र के उच्चारण से 'यज्ञोपवीत' प्रदान करें ।

आभूषण-मंत्र—

"अनेकरत्नयुक्तानि भूषणानि बहूनि च ।
तत्तदङ्गे काञ्चनानि योजयामि तवाज्ञया ॥"

इस मन्त्र के उच्चारण से 'आभूषण' प्रदान करें ।

चन्दन-मंत्र—

अष्टगन्धसमायुक्तं रक्तचन्दनमुत्तमम् ।
द्वादशाङ्गेषु ते देव लेपयामि कृपाङ् कुरु ॥"

इस मंत्र के उच्चारण से 'चन्दन' प्रदान करें ।

अक्षत-मंत्र—

"रक्तचन्दनसंमिश्रांस्तन्दुलांस्तिलकोपरि ।
शोभायै सम्प्रदास्यामि गृहाण परमेश्वर ॥"

इस मंत्र के उच्चारण से 'अक्षत' प्रदान करें ।

पुष्प-मंत्र—

"पाटलं कर्णिकारञ्च गन्धकं रक्तपङ्कजम् ।
मोगरम्मालतीपुष्पं गृहाण सुमनोहरम् ।"

इस मंत्र के उच्चारण से 'पुष्प' प्रदान करें ।

धूप-मंत्र—

"दशाङ्गङ्गुग्गुलन्धूपं सर्व्वसौगन्ध्यकारकम् ।
सर्व्वपापक्षयकरन्त्वं गृहाण मयार्प्पितम् ॥"

इस मंत्र के उच्चारण से 'धूप' प्रदान करें ।

दीपक-मंत्र—

"सर्व्वज्ञ सर्वलोकेश तमोनाशनमुत्तमम् ।
गृहाण मङ्गलन्दीपन्देव देवनमोऽस्तु ते ।"

इस मंत्र के उच्चारण से 'दीपक' प्रदर्शित करें ।

नैवेद्य-मंत्र—

"नानापक्वान्नसंयुक्तम्पायसं शर्करान्वितम् ।
नानाव्यञ्जनशोभाढ्यं शाल्योदनमनुत्तमम् ॥
दधिदुग्धघृतैय्युक्तं लवङ्गैलासमन्वितम् ।
मरीचिचूर्णसहितन्वथिकावटकान्वितम् ॥
राजिकाधान्यसंय्युक्तम्मेथीपिष्टं सतक्रकम् ।
हिङ्गुजीरककूष्माण्डम्मरीचिमाषपिष्टकैः ॥
सम्पादितैः सुपक्वैश्च भर्जितैर्व्वटकैर्य्युतम् ।
मोदकापूपलड्डूकशष्कुलीमण्डकादिभिः ॥
पर्प्पटैरपि सय्युक्तन्नैवेद्यममृतान्वितम् ।
हारिद्राहिङ्गुलवणसहितं सूपमुत्तमम् ॥
ससामुद्रं गृहाणेदम्भोजनङ् कुरु सादरम् ॥"

इन मंत्रों के उच्चारण से 'नैवेद्य' प्रदान करें ।

आचमनीय-मंत्र—

"सुतृप्तिकारकन्तोयं सुगन्धञ्च पिबेच्छया ।
त्वयि तृप्ते जगत्तृप्तन्नित्यतृप्ते महात्मनि ॥

उत्तरापोशनार्थन्ते दधि तोयं सुवासितम् ।
मुखपाणिविशुद्ध्यर्थम्पुनस्तोयन्ददामि ते ॥"

इस मंत्र के उच्चारण से 'आचमनीय' प्रदान करें ।

फल-मंत्र—

"दाडिमम्मधुरन्निम्बुजम्वाम्रपनसादिकम् ।
द्राक्षारम्भाफलम्पक्वङ्कर्कन्धू: खार्जुरम्फलम् ॥
नारिकेलञ्च नारिङ्गमञ्जिरञ्जम्बिरन्तथा ।
उर्वारुकञ्च देवेश फलान्येतानि गृह्यताम् ॥"

आचमनीय कर उद्वर्त्तनादि मंत्र—

"मुखपाणिविशुद्ध्यर्थम्पुनस्तोयन्ददामि ते ।
गृहाण चन्दनञ्चारु कराङ्गोद्वर्तनं शुभम् ॥"

इस मंत्र द्वारा 'आचमनीय सहित करोद्वर्त्तन' प्रदान करें ।

सिन्दूर मंत्र—

"चारुश्मलूरसम्भूतंव्वंशसारसमुद्भवम् ।
सीमन्तभूषणञ्चूर्णल्लाक्षारञ्जितमस्तु ते ॥"

इस मंत्र के उच्चारण से 'सिन्दूर' प्रदान करें ।

ताम्बूल-मंत्र—

"सचन्द्रपूगवर्णाढ्यङ्खाद्यखादिरसंय्युतम् ।
एलालवङ्गसंमिश्रं ताम्बूलङ्करसान्वितम् ॥"

इस मंत्र द्वारा 'ताम्बूल' प्रदान करें ।

दक्षिणा-मंत्र—

"न्यूनातिरिक्तपूजायाः सम्पूर्णफलहेतवे ।
दक्षिणाङ्काञ्चनीन्देव स्थापयामि तवाग्रतः ॥"

इस मंत्र द्वारा 'दक्षिणा' प्रदान करें ।

माला मंत्र—

"सितपीतैस्तथा रक्तैर्ज्जलजैः कुसुमैः शुभैः ।
ग्रथितां सुन्दराम्मालाङ्गृहाण परमेश्वर ॥"

इस मंत्र के उच्चारण से 'माला' प्रदान करें ।

दूर्वा-मन्त्र—

"हरिता श्वेतवर्णा वा पञ्चत्रिपत्रसंय्युताः ।
दूर्वाङ्कुरा मया दत्ता एकविंशतिसम्मिताः ॥

इस मन्त्र द्वारा 'दूर्वा' प्रदान करें ।

प्रदक्षिणा-मन्त्र—

"एकविंशतिसंख्याकाः कुर्य्यादिव प्रदक्षिणाः ।
पदे पदे ते देवेश नश्यन्तु पातकानि मे ॥"

इस मन्त्र द्वारा 'प्रदक्षिणा' करें ।

आरात्तिक-मंत्र—

"औदुम्बरे राजते वा कांस्ये काञ्चनसम्भवे ।
पात्रे प्रकल्पितान्दीपान्गृहाण चतुरर्पितान्
पञ्चारात्तिम्पञ्चदीपैर्द्दीपिताम्परमेश्वर ।
चारुचन्द्रनिभं दीपं गृहाण वीचिवारणम् ॥
यथास्य नेक्ष्यते भस्म तथा पापं विनाशय ॥"

श्रीगणेश षडाक्षर-मन्त्र—

"वक्रतुंडाय हुं ।"

यह श्रीगणेश जी का षडाक्षर मन्त्र है ।

इस मन्त्र के भार्गव ऋषि अनुष्टुप् छन्द, विघ्नेश देवता व बीजशक्ति है तथा अभीष्ट सिद्धि में इसके जप का विनियोग है ।

साधनविधि—

प्रथम षडङ्गन्यास करके एक लाख की संख्या में मन्त्र का जप करके अष्ट द्रव्यों द्वारा दशांश होम करें ।

ध्यान का स्वरूप—

इस मन्त्र के साधन में श्रीगणेश जी का ध्यान इस प्रकार कहा गया है :—

"उद्यद्दिनेश्वररुचिं निजहस्तपद्मैः
पाशांकुशाभयवरान्दधतं गजास्यम् ।

"रक्तांबरं सकलदु:खहरं गणेशं
ध्यायेत्प्रसन्नमखिलाभरणाभिरामम् ॥"

अन्य सभी क्रियायें पूर्वोक्त मन्त्र की भाँति ही करें। अष्ट द्रव्यों के सम्बन्ध में इस प्रकार कहा गया है —

"इक्षव: सक्तवो रंभाफलानि चिपिटास्तिला: ।
मोदका नारिकेलानि लाजा द्रव्याष्टकं स्मृतम् ॥"

विनायक के इस मन्त्र के साथ मन्त्र में पीठशक्तियों का पूजन करें। पीठशक्तियों के नाम इस प्रकार हैं :—

(1) तीव्रा, (2), चालिनी, (3) नंदा, (4) भोगदा, (5) कामरूपिणी, (6) उग्रा, (7) तेजोवती, (8) सत्या और (9) विघ्ननाशिनी ।

प्रतिदिन दो सहस्र की संख्या में 6 मास तक इस मन्त्र का जप करने से दरिद्रता नष्ट हो जाती है।

श्रीगणेश जी का एकत्रिशद्वर्ण मंत्र—

"रायस्पोषस्य ददिता निधिदो रत्नधातुमान्नक्षोहणीबलगहनो वक्रतुंडाय हुं।"

यह श्रीगणेश जी का मन्त्र इकत्तीस वर्णों का है। इसकी साधन विधि व पूजनविधि पूर्वोक्त मन्त्र की भाँति ही की जाती है।

श्रीगणेश जी के अन्य मंत्र—

"मेघोल्काय स्वाहा।" इस मन्त्र का जप एक लाख की संख्या में करना चाहिए। अन्य सब विधियाँ पूर्ववत् हैं।

"हस्तिपिशाचि लिखे स्वाहा।"

इस मन्त्र का जप भी एक लाख की संख्या में करना चाहिए। अन्य सभी विधियां पूर्ववत् हैं।

ओं ह्रीं ग्रीं ह्रीं ।

इस चार अक्षर के मंत्र की साधन विधि भी पूर्ववत् ही है।

लक्ष्मी-गणेश-मन्त्र—

"ओं श्रीं गं सौम्याय गणपतये वरवरद
सर्वजनं मे वशमानय स्वाहा।"

यह अट्ठाईस वर्ण वाला मन्त्र लक्ष्मीगणेश का है।

इस लक्ष्मी विनायक मन्त्र के अन्तर्यामी ऋषि, गायत्री छन्द, लक्ष्मी विनायक देवता, बीज तथा स्वाहा शक्ति हैं। अभीष्ट सिद्धि के लिये इसके जप का विनियोग है। इस मत्र का चार लाख की संख्या में जप करके विल्व की समिधाओं से दशांश होम करना चाहिए।

(1) वलाका, (2) विमला, (3) कमला, (4) वनमालिका, (5) विभीषिका, (6) मालिका, (7) शाङ्करी (8) सुवालिका। —इन आठ शक्तियों की अंग पूजा करनी चाहिए। दक्षिण तथा वामपार्श्व में शंख और पद्मनिधि की पूजा करनी चाहिए तथा लोकपाल और उनके अस्त्रों की बाह्य भाग में पूजा करनी चाहिए। इस विधि द्वारा साधन करने पर मंत्र सिद्ध हो जाता है तथा साधक की समस्त मनोभिलाषायें पूर्ण हो जाती हैं। नाभिपर्यन्त जल में खड़े होकर सूर्यमण्डल की ओर दृष्टि गढ़ाये हुए इस मंत्र का तीन लाख की संख्या में जप करने से धन की वृद्धि होती है।

त्रैलोक्यमोहनकर गणेश-मंत्र—

वक्रतुण्डकदंष्ट्राय क्लीं ह्रीं श्रीं गं गणपतये वर
वरद सर्वजनं मे वशमानय स्वाहा।

इस मंत्र के गणक ऋषि, गायत्री छन्द तथा त्रैलोक्य मोहनकर गणेश देवता हैं। अभीष्ट सिद्धि में इनके जप का विनियोग है।

ध्यान और जप—

गदाबीजपूरे धनुशूलचक्रे सरोजोत्पले पाशधान्याग्रदन्तान्।
करै: सन्दधानं स्वशुंडाग्रराजन्मणिकुम्भमकाधिरूढं स्वपत्न्या।
सरोजन्मनीं भूषणानां भरेणोज्ज्वलद्धस्ततन्व्या समालिङ्गिताङ्गम्।
करीन्द्राननं चन्द्रचूडं त्रिनेत्रं जगन्मोहनं रक्तकान्तिं भजेत्तम्।

उपरोक्त मंत्र का चार लाख की संख्या में जप करके अष्ट द्रव्यों का दशांश होम करना चाहिए तथा पूर्वोक्त पीठों एवं दिक्पालों की उनके अस्त्रों

सहित पूजा करनी चाहिए। इस मंत्र को सिद्ध करके आप तीनों लोकों को मोहित कर सकते हैं।

हरिद्रा गणेश मंत्र—

"ओं हुँ गं ग्लौं हरिद्रागणपतये वरद सर्वजन-
हृदयं स्तम्भय स्तम्भय स्वाहा।"

इस मंत्र के मदन ऋषि, अनुष्टुप् छन्द तथा हरिद्रा गणनायक देवता हैं। अभीष्ट सिद्धि के लिए इसके जप का विनियोग है।

ध्यान और जपविधि—

इस मंत्र का ध्यान निम्न प्रकार से करें—

"पाशाङ्कुशौ मोदकमेकदन्तं करैर्दधानं कनकासनस्थम्।
हरिद्रखण्डं प्रतिमं त्रिनेत्रं पीतांशुकं रात्रिगणेशमीडे।"

इस मन्त्र का चार लाख की संख्या में जप करके हरिद्रा चूर्ण मिश्रित दशांश चावलों का होम करना चाहिए तथा ब्राह्मणों को भोजन कराना चाहिए, पूर्वोक्त पीठ, अङ्ग मातृकादि का पूजन करना चाहिए। शुक्ल पक्ष की चतुर्थी को क्वारी कन्या के हाथ से हरिद्रा (हल्दी) पिसवा कर अपने शरीर पर लेप करके स्नानोपरान्त गणेश जी का पूजन करके तर्पण करते हुए आठ सहस्र की संख्या में मन्त्र का जप करके, घृत मिश्रित पुओं का एक सौ की संख्या में हवन करके ब्रह्मचारियों को भोजन कराये तथा कुमारियों को सन्तुष्ट कर, गुरु से अभिलषित फल की प्राप्ति होती है। शत्रुओं का मुख स्तंभित होता है। जल, अग्नि, चोर, सिंह आदि हिंस्र जन्तुओं का निरोध होता है।

वन्ध्या स्त्री को रजस्नान से निवृत्त होकर गणेश जी का पूजन करना चाहिए तथा एक पल हल्दी को गोमूत्र में पीसकर उसको एक हजार की संख्या में इस मन्त्र से अभिमंत्रित करना चाहिए। फिर कन्या तथा ब्रह्मचारियों को लड्डुओं का भोजन कराना चाहिए। तत्पश्चात् पूर्ववत् हल्दी का पूजन करना चाहिए तथा उक्त अभिमंत्रित पिसी हुई हल्दी का पान करना चाहिए। इस प्रकार करने से गुणवान् पुत्र की प्राप्ति होती है।

उच्छिष्ट गणेश साधन
(द्वितीय चरण)

यहाँ पर अब उच्छिष्ट गणेश साधन मन्त्र एवं पूजन-विधि प्रस्तुत की जा रही है।

उच्छिष्टगणेश मन्त्र :—

(क) 'ओं हस्तिपिशाचिनि खे ठः ठः।'

(ख) 'ओं हस्तिपिशाचिनि खे स्वाहा।'

(ग) 'गं हस्तिपिशाचिनि खे स्वाहा।'

उपरोक्त तीनों मन्त्रों में से किसी एक मन्त्र द्वारा उच्छिष्ट-गणेश का साधन किया जा सकता है

इस देवता की आराधना में तिथि, वार आदि का कोई नियम नहीं है उपवास आदि करने की आवश्यकता नहीं होती। जो मनुष्य जिस मनोरथ से इस देवता की आराधना करता है उसकी वह अभिलाषा पूर्ण होती है।

प्रयोग विधि—

सामान्यविधि के अनुसार प्रातः कृत्यादि से निवृत्त होकर प्राणायाम के पश्चात् सभी कार्यों का सम्पादन करना चाहिए। उसके पश्चात् ऋष्यादि न्यास करना चाहिए।

ऋष्यादि न्यास इस प्रकार करें :—

"शिरसि सुघोरऋषये नमः।
मुखे निबिडगायत्रीछन्दसे नमः।
हृदि उच्छिष्टगणपतये नमः।"

कराङ्ग-न्यास—

ऋष्यादि न्यास के पश्चात् निम्नलिखित विधि से कराङ्ग न्यास करना चाहिए।—

ओं अंगुष्ठाभ्यां नमः।
ओं तर्जनीभ्यां स्वाहा।
ओं मध्यमाभ्यां वषट्।
ओं अनामिकाभ्यां हुं।

ओं कनिष्ठाभ्यां वौषट् ।
ओं करतलकरपृष्ठाभ्यां फट ।
ओं हृदयाय नमः ।
ओं शिरसे स्वाहा ।
ओं शिखायै वषट् ।
ओं कवचाय हुँ ।
ओं नेत्रत्रयाय वौषट् ।
ओं करतलकरपृष्ठाभ्यां फट् ।

इस विधि से कराङ्ग न्यास करने के पश्चात् ध्यान करना चाहिए ।

ध्यान का स्वरूप—

"रक्तमूर्ति गणेशं च सर्वाभरणभूषितम् ।
रक्तवस्त्रं त्रिनेत्रं च रक्तपद्मासने स्थितम् ॥
चतुर्भुजं महाकायं द्विदन्तं सस्मितानन्म् ।
इष्टं च दक्षिणे हस्ते दन्तं च तदधः करे ॥
पाशांकुशौ च हस्ताभ्यां जटामण्डलवेष्टितम् ।
ललाटे चन्द्ररेखाढ्यं सर्वालंकारभूषितम् ॥"

भावार्थ—"उच्छिष्ट गणेश रक्त वर्ण हैं। उनके वस्त्र, पहिनावा तथा नेत्र लाल वर्ण के हैं। रक्त-कमल के आसन पर विराजमान हैं। उनके चार हाथ हैं, शरीर बड़ा है, दो दाँत हैं तथा मुख पर हास्य की रेखा सदैव विद्यमान रहती है। उनके दाँई ओर के ऊपर हाथ में वरमुद्रा है तथा नीचे का हाथ एक दांत को पकड़े हुये है। बांई ओर के ऊपर हाथ में पाश है तथा नीचे के हाथ में अंकुश है। उनके मस्तक पर जटामण्डल तथा अर्द्धचन्द्र सुशोभित है।"

पूजन विधि—

ध्यान के पश्चात् मूल मंत्र से अर्घ्य स्थापित करके, अर्घ्य के जल से पूजा के उपकरण द्रव्य तथा अपने शरीर पर छींटे देने चाहिएं। फिर दूसरी बार देवता का ध्यान करके उन्हें अष्टदल पद्म में स्थापित करे। फिर पंचोपचार से देवता की पूजा करके अष्टदल पद्म के पूर्वादि पत्र में 'ओं वक्रतुण्डाय

स्वाहा, ओं एकदन्ताय स्वाहा, ओं लम्बोदराय स्वाहा, ओं विकटाय स्वाहा, ओं विघ्नेशाय स्वाहा, ओं गजवक्त्राय स्वाहा, ओं विनायकाय स्वाहा, ओं गणपतये स्वाहा, तथा मध्य में ओं हस्तिमुखाय स्वाहा,

इस मंत्र से देवताओं की पूजा करे। फिर तीन मूल देवता ओं की पूजा करके, यथाशक्ति मूल मंत्र का जप करते हुए जप समर्पण करे।

इसके पश्चात् "ओं उच्छिष्टगणेशाय महाकालाय एष बलिर्नमः" इस मंत्र से बलि देकर, आचमनीयादि प्रदान करे। विशेष फल की इच्छा रखने वाले व्यक्ति को "ह्रां ह्रीं ह्रूँ ह्रूं फट् स्वाहा"—इस मंत्र से पुनर्वार बलि प्रदान करनी चाहिए, फिर एक पुष्प दक्षिण दिशा में फेंककर 'क्षमस्व' कहते हुए विसर्जन करना चाहिए।

पुरश्चरणविधि—

इस मंत्र के पुरश्चरण में सोलह सहस्र की संख्या में मंत्र का जप करना चाहिए। कृष्ण पक्ष की चतुर्दशी से आरम्भ करके शुक्ल पक्ष की चतुर्थी तक स्त्री (पत्नी) के सहयोग से (साथ लेकर) प्रतिदिन एक सहस्र की संख्या में जप करना चाहिए। देवता को प्रतिदिन मधु से स्नान कराकर गुड़-पायस का नैवेद्य प्रदान करना उचित है। भोजनोपरान्त आचमन किए बिना ही उच्छिष्ट (जूठे) मुख से देवता का जप करना चाहिए।

श्वेत आक या लाल चन्दन द्वारा अंगुष्ठ प्रमाण उच्छिष्ट गणपति की प्रतिमूर्ति बनाकर उसमें प्राण प्रतिष्ठा पूर्वक, ब्राह्मण, अग्नि तथा गुरु के समीप सोलह सहस्र की संख्या में मंत्र का जप करने पर ही मंत्र की सिद्धि होती है। केवल मानसिक जप ही करना चाहिए। कुछ तन्त्रों के मतानुसार कराङ्ग न्यास नहीं करना चाहिए तथा "मैं स्वयं ही गणेश स्वरूप हूं" इस प्रकार चिन्तन करते हुये जप करना चाहिए। इस सम्बन्ध में गर्ग मुनि का यह कहना है कि निर्जन वन में बैठकर लाल चन्दन से लिप्त ताम्बूल (पान) को चबाते हुए जप करना चाहिए। अन्य तन्त्रानुसार साधक को सब प्रकार

के आभूषणों से विभूषित होकर जप करना चाहिए । एक अन्य तन्त्र के मतानुसार इस देवता की पूजा में लड्डू खाते हुए जप करना चाहिए ।

भृगु मुनि के मतानुसार उच्छिष्ट-गणपति की आराधना में फल भक्षण करते हुए जप करना चाहिए तथा विभीषण के मतानुसार नैवेद्य का भोजन करते हुए जप करना चाहिए ।

उच्छिष्ट गणेश का एकोनविंशति वर्णमन्त्र—

"ओं नमः उच्छिष्टगणेशाय हस्तिपिशाचिनि खे स्वाहा ।"

इसकी साधन विधि पूर्ववत् है । यह उन्नीस वर्ण का मन्त्र है ।

उच्छिष्ट गणेश का सप्तत्रिंशदक्षर मन्त्र—

"श्रों नमो भगवते एकदंष्ट्राय हस्तिमुखाय लम्बोदराय उच्छिष्टमहात्मने श्रां क्रों ह्रीं गं घे घे स्वाहा ।"

यह सैंतीस अक्षर का मंत्र है और साधन विधि पूर्ववत् है ।

उच्छिष्ट गणेश का द्वात्रिंशद्वर्ण मंत्र—

"श्रों हस्तिमुखाय लम्बोदराय उच्छिष्टमहात्मने
श्रां क्रों ह्रीं हूं घे घे उच्छिष्टाय स्वाहा ।"

यह बत्तीस वर्ण का मन्त्र है, साधन विधि पूर्ववत् है ।

उच्छिष्ट गणपति के विशेष प्रयोग—

1. राजद्वार, वन, सभा, गोत्र, समाज, विवाद, व्यवहार, युद्ध, शत्रु संकट, द्यूतक्रीड़ा, विपत्तिकाल, ग्रामदाह चोर-भय, तथा सिंह व्याघ्रादि का भय उपस्थित होने पर इस देवता के स्मरण से समस्त भयों का तथा विघ्न का नाश हो जाता है ।

2. मूल मन्त्र द्वारा अपामार्ग की समिधा को एक सौ आठ बार अभिमन्त्रित करके होम करने पर साधक को सौभाग्य की प्राप्ति होती है ।

3. इस मन्त्र द्वारा एक करोड़ की संख्या में होम करने पर अणिमादिक अष्ट सिद्धियों की प्राप्ति होती है ।

4. इस मन्त्र को भोजपत्र पर लिख कर कंठ अथवा मस्तक पर धारण करने से सौभाग्य की वृद्धि तथा सर्वत्र रक्षा होती है ।

5. विवाहार्थी मनुष्य यदि पांच सहस्र की संख्या में इस मन्त्र का जप करे तो उसे श्रेष्ठ स्त्री की प्राप्ति होती है ।

6. जिस साध्य व्यक्ति का नाम लेकर मूलमन्त्र का एक सहस्र की संख्या में जप किया जाय, वह वशीभूत होता है ।

7. इस मन्त्र द्वारा दस सहस्र की संख्या में होम करके अभिलषित राजा को वशीभूत किया जा सकता है ।

8. उच्छिष्ट गणेश का मन्त्र एक लाख की संख्या में जपने पर राजा, दो लाख की संख्या में जपने पर राजा के समस्त कर्मचारी आदि वशीभूत होते हैं ।

9. बन्दर की हड्डी से बनी कील को मूल मंत्र से अभिमन्त्रित करके जिस मनुष्य के घर में गाड़ दिया जाये, उसका उच्चाटन होता है ।

10. उपर्युक्त प्रकार की कील को यदि किसी बाजार में गाड़ दिया जाये तो वहाँ क्रय-विक्रय का व्यापार अवरुद्ध हो जाता है ।

11. उपर्युक्त प्रकार की कील को यदि कलाल (शराब बनाने व बेचने वाले) के घर में गाड़ दिया जाये तो उसके घर में रखी हुई शराब बिगड़ जाती है ।

12. उपर्युक्त कील को यदि किसी वेश्या के घर में गाड़ दिया जाये तो उसका कोई आदर नहीं करता ।

13. उपर्युक्त कील को यदि किसी क्वारी कन्या के घर में गाड़ दिया जाये तो उसका विवाह नहीं होता ।

14. मनुष्य की हड्डी से बनी कील को मूल मन्त्र से अभिमन्त्रित करके किसी मनुष्य के घर में गाड़ दिया जाये तो उसकी मृत्यु हो जाती है । कील उखाड़ लेने पर दोष की शान्ति हो जाती है ।

3

गणपति-पूजन

किसी भी कार्य एवं साधन के प्रारम्भ में श्रीगणेश जी का पूजन करना अत्यावश्यक कहा गया है। अतः यहाँ हम श्रीगणेश जी के पूजन की विधि का वर्णन कर रहे हैं।

सर्वप्रथम साधक को चाहिए कि वह प्रातःकाल उठकर नित्य कर्म स्नानादि से निवृत्त होकर शुद्ध वस्त्र धारण कर, प्रथम सामग्री संकलन, आचमन, दीप-पूजन, अर्घ्य-स्थापन आदि कृत्य समाप्त करके सर्वविघ्ननाशक गणपति का पूजन प्रारम्भ करे।

सबसे पूर्व हाथ में दूर्वा, अक्षत (चावल) और पुष्प लेकर निम्नलिखित मन्त्रों का सस्वर उच्चारण करे—

ओं सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्ननाशो गणाधिपः ॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ॥
नवरत्नमयं द्वीपं स्मरेदिक्षुरसाम्बुधौ ।
तद्वीचिधौतपर्यन्तमन्दमारुतसेवितम् ॥
मन्दारपारिजातादिकल्पवृक्षलताकुलम् ।
उद्भूतरत्नच्छायाभिररुणीकृतभूतलम् ॥
उद्यद्दिनकरेन्दुभ्यामुद्भासितदिगन्तरम् ।
तस्य मध्ये परिजातन्नवरत्नमय स्मरेत् ॥

ऋतुभिः सेवितं षड्भिरनिशम्प्रीतिवर्द्धनैः ।
तस्याधस्तान्महापीठरचिते मातृकाम्बुजे ।
षट्कोणान्तस्त्रिकोणाढ्यम्महागणपतिं स्मरेत् ॥
हस्तीन्द्राननमिन्दुचूडमरुणच्छायन्त्रिनेत्रं रसा-
दाश्लिष्टम्प्रियया सपद्मकरया स्वाङ्कस्थया सन्ततम् ।
बीजापूरगदाधनुस्त्रिशिखियुक्चक्राब्जपाशोत्पल-
कञ्जाभः स्वविषाणरत्नकलशौ हस्तैर्वहन्तम्भजे ।
गण्डपालीगलद्दानपूरलालसमानसान् ।
द्विरेफान्कर्णतालाभ्यां वारयन्तम्मुहुर्मुहुः ॥
कराग्रधृतमाणिक्यकुम्भवक्त्रविनिस्सृतै-
रत्नवर्षैः प्रीणयन्तं साधकम्मदविह्वलम्
माणिक्यमुकुटोपेतं रत्नाभरणभूषितम् ॥

उपरोक्त मन्त्रोच्चारण करके हाथ के दूर्वा अक्षत तथा पुष्प को गणेश की मूर्ति के समीप समर्पित करे।

तत्पश्चात् तिल, कुश और जल हाथ में लेकर निम्न संकल्प करे—

संकल्प

ओं विष्णुः विष्णुः विष्णुः नमः परमात्मने श्रीपुराणपुरुषोत्तमाय । विष्णोराज्ञया प्रवर्तमानस्याद्यब्रह्मणो द्वितीये प्रहरार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे द्वितीये यामे तृतीये दिवसे जम्बूद्वीपे भरतखण्डे आर्य्यावर्तान्तर्गतदेशैकपुण्यक्षेत्रे, 'अमुक' सम्वत्सरे 'अमुक' अयने, 'अमुक' ऋतौ 'अमुक' मासे, 'अमुक' पक्षे, 'अमुक' तिथौ, 'अमुक' नक्षत्रे, 'अमुक' योगे, 'अमुक' उपयोगे 'अमुक' करणे, 'अमुक' वासरे, 'अमुक' राशिस्थिते सूर्ये चन्द्रे भौमे बुधे गुरौ भार्गवे शनौ राहौ केतौ तथा राशिस्थानस्थितेषु ग्रहेषु काले श्रुतिस्मृतिपुराणोक्तचतुर्वर्गफलप्राप्तये एवं गुणवैशिष्ट्येन विशिष्टे 'अमुक' गोत्रः 'अमुक' राशिः 'अमुक' शर्मा वाऽहं मम करिष्यमाणासंस्कारकर्मणि भगवतो गणेशस्य तथा कलशस्थापनपुण्याहवाचननीराजनमातृकापूजनवसोधारानिपातनाभ्युदयिकनान्दीश्राद्धनवग्रहादीनां पञ्चोपचारेण वा षोडशोपचारेण निर्विघ्नतया कार्य्यसिद्धये पूजनं करिष्ये ।

इस संकल्प को पढ़कर हाथ के अक्षत पुष्प आदि को गणेश जी की प्रतिमा के समीप छोड़ दे। संकल्प में जहाँ-जहाँ 'अमुक' शब्द आया है वहाँ वहाँ यथोचित उच्चारण करे। इसके पश्चात् गणेश जी का नीचे लिखे अनुसार आवाहन करे।

आवाहन-मंत्र

"ओं एहि हेरम्ब त्वं मे देहि अम्बिकात्र्यम्बकात्मज। सिद्धिबुद्धिपते त्र्य लक्षलाभपितु: पित:। नागास्य नागहार त्वं गणराज चतुर्भज। भूषित: स्वायुधै दिव्यै: पाशाङ्कुशपरश्वधै:। आवाहयामि पूजार्थं रक्षार्थं च मम क्रतो:। इहागत गृहाण त्वं पूजाकर्तुश्च रक्ष मे।"

प्रतिष्ठापन के लिए मन्त्र निम्नलिखित है—

"ओं एतन्ते देव सवितुर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे। तेन यज्ञमव तेन माम मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञं समिमं दधातु विश्वे देवा स इह मादयन्तामोम् प्रतिष्ठेति।"

इस मंत्र से प्रतिष्ठापन करने के उपरान्त निम्न मंत्र से स्थापन करना चाहिए।

स्थापन-मंत्र

"ओं गणानां त्वेति प्रजापतिऋषिर्यजुश्छन्दो गणपतिदेवता गणपतिस्थापने विनियोग:।

ओं गणानां त्वा गणपतिं हवामहे निधीनां त्वा निधिपतिं हवामहे व्वसो मम आहमजानि गर्भधमा त्वमजासि गर्भधम्। ओं भूर्भुव: स्व: गणपते इहागच्छ इहातिष्ठ। विनायक नमस्तेस्तु उमामलसमुद्भव। इमां मया कृतां पूजां गृहाण सुरसत्तम"

अब आसन देने के लिए

आसनमंत्र—

"सुमुखाय नमस्तुभ्यं गणाधिपतये नम:।
गृहाणासनमीश त्वं विघ्नपुञ्जं निवारय॥"

पाद्य मन्त्र—

"उमापुत्राय देवाय सिद्धवन्द्याय ते नम:।
पाद्यं गृहाण देवेश विघ्नराज नमोस्तु ते॥"
इस मंत्र से पाद्य प्रदान करे।

अर्घ्य-मंत्र—

"एकदन्त महाकाय नागयज्ञोपवीतक।
गणाधिदेवदेवेश गृहाणार्घं नमोस्तु ते॥"

पंचामृत-स्नान-मन्त्र—

"पयोदधिघृतक्षौद्रै: शर्करामिश्रितै: कृतम्।
पञ्चामृतं गृहाणेदं स्नानार्थं विघ्नभञ्जनम्॥"

स्नानीयजल-मन्त्र—

"नर्मदा चन्द्रभागादिगङ्गासङ्गमजैर्जलै:।
स्नापितोसि मया देव विघ्नं सद्य: निवारय॥"

स्थानीय जल के पश्चात् यज्ञोपवीत प्रदान करने के लिए यह मंत्र उच्चारण करे—

यज्ञोपवीत-मन्त्र—

"सूर्यंकोटिसमाभासं नागयज्ञोपवीतकम्।
सुवर्णमूले रचितमुपवीतं गृहाण मे॥"

वस्त्र-मन्त्र—

"रक्ताम्बरधर श्रेष्ठ पाशांकुशधरेश्वर।
वस्त्रयुग्मं मया दत्तं गृहाण परमेश्वर॥"
वस्त्र प्रदान करने के पश्चात् आचमनीय प्रदान करना चाहिए -

आचमनीय मन्त्र—

"सुगन्धमिश्रतीर्थादिपूतं पानीयमुत्तमम्।
आचमार्थं गृहाण त्वं विघ्नराज वरप्रद॥"
आचमनीय के पश्चात् निम्नलिखित मन्त्र से गन्ध प्रदान करना चाहिए।

गन्ध-मंत्र—

"ईशपुत्र नमस्तुभ्यं नमो मूषकवाहन।

गन्धं गृहाण देवेश सर्वसौख्यं विवर्धय ॥"

इसके उपरान्त अक्षत-प्रदान करे।

अक्षत-मंत्र—

"रक्तचन्दनसंमिश्रैरक्षतैर्योतयाम्यहम्।
सर्वभूतहितार्थाय विघ्नराज जगद्गुरो ॥"

पुष्प-मंत्र—

"पाटला मल्लिका दूर्वा शतपत्राणि विघ्नहृत्।
पुष्पं गृहाण देवेश विबुधप्रिय सर्वतः ॥"

उपरोक्त मन्त्र द्वारा पुष्प प्रदान करने के पश्चात् धूप प्रदान करने के लिए निम्न मन्त्र उच्चारण करे।

धूप-मंत्र—

"लम्बोदर महाकाय धूम्रकेतो नमो नमः।
धूपं गृहाण देवेश विघ्नपुञ्जं निवारय ।।"

दीपक-प्रदर्शन मंत्र—

"घृताक्तवर्तिसंयुक्तं वह्निना योजितं मया।
दीपं गृहाण देवेश रुद्रप्रिय नमोऽस्तु ते ॥"

दीपक के उपरान्त निम्न मन्त्र द्वारा नैवेद्य समर्पण करे।

नैवेद्य मंत्र—

"भालचन्द्र नमस्तुभ्यं विघ्नहृन्मोदकप्रिय।
नानाविधं गृहाणेदं नैवेद्यं कृपया प्रभो ॥"

नैवेद्य के उपरान्त नीचे लिखे मन्त्र द्वारा जल प्रदान करना चाहिए

जल-मंत्र—

"लम्बोदर महाकाय गौरीसुत नमोऽस्तु ते।
करानन विशुद्ध्यर्थं जलमेतद् गृहाण मे ॥"

अब फल प्रदान करने के लिए यह मन्त्र उच्चारण करे।

फल-मंत्र—

"इदं फलं मया देव स्थापित पुरतस्तव।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥"

फल चढ़ाने के पश्चात् पुष्प द्वारा जल के छींटे देते हुए इस प्रकार उचारे—

"ओं गणाधिपतये नमः दूर्वाङ्कुरयुग्मं समर्पयामि।
ओं उमापुत्राय नमः ,, ,, ,,।
ओं अघनाशिने नमः ,, ,, ,,।
ओं एकदन्ताय नमः ,, ,, ,,।
ओं इभवक्त्राय नमः ,, ,, ,,।
ओं मूषकवाहनाय नमः ,, ,, ,,।
ओं विनायकाय नमः ,, ,, ,,।
ओं ईशपुत्राय नमः ,, ,, ,,।
ओं सर्वसिद्धिप्रदायकाय नमः ,, ,,।
ओं कुमारगुरवे नमः ,, ,, ,,।
ओं चतुर्थीशाय नमः ,, ,, ,,।
ओं सर्वविघ्नहराय नमः ,, ,, ,,।"

इसके पश्चात् नीराजन प्रदान करें।

नीराजन मंत्र—

"ओं अन्तस्तेजो बहिस्तेज एकीकृत्यामितप्रभम्।
नीराजनमिदं देव गृहाण मदनुग्रहात् ॥"

अब प्रार्थना करनी चाहिए। हाथ जोड़ कर नतमस्तक होकर इस प्रार्थना मन्त्र का उच्चारण करें।

प्रार्थना मंत्र—

विघ्नेश्वराय वरदाय सुरप्रियाय
लम्बोदराय सकलाय जगद्धिताय।
नागाननाय श्रुतियज्ञविभूषिताय
गौरीसुताय गणनाथ नमो नमस्ते ॥
भूतार्तिनाशनपराय गणेश्वराय
सर्वेश्वराय शुभदाय सुरेश्वराय।
विद्याधराय विकटाय च वामनाय

भक्तप्रसन्नवरदाय नमो नमस्ते ॥
नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः ।
नमस्ते रुद्ररूपाय करिरूपाय ते नमः ॥
विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे ।
भक्तिप्रियाय देवाय नमस्तुभ्यं विनायक ॥
लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

गणेशस्तवराज—

गणेश जी का निम्नलिखित स्तोत्र पाठ करने से साधक की सभी अभिलाषाएँ पूर्ण होती हैं—

ओं तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि ।
तन्नो दन्ती प्रचोदयात् ॥
ओंकारमाद्यम्प्रवदन्ति सन्तो
वाचः श्रुतीनामपि यं गृणन्ति ।
गजाननन्देवगणानताङ्घ्रि-
म्भजेहमर्द्धेन्दुकृतावतंसम् ॥
पादारविन्दार्च्चनतत्पराणां
संसारदावानलभङ्गदक्षम् ।
निरन्तरन्निर्गतदानतोयं
तन्नौमि विघ्नेश्वरमम्बुदाभम् ॥
कृताङ्गरागन्नवकुङ्कुमेन
मत्तालिजालम्मदपङ्कलग्नम् ।
निवारयन्तन्निजकर्णतालैः
को विस्मरेत्पुत्रमनङ्गशत्रोः ॥
शम्भोर्ज्जटाजूटनिवासिगङ्गाजलं समानीय कराम्बुजेन ।
लीलाभिराराच्छिवमर्च्चयन्तङ्गजाननम्भक्तियुता भजन्ति ॥
कुमारभुक्तौ पुनरात्महेतोः पयोधरौ पर्व्वतराजपुत्र्याः ।

प्रक्षालयन्तङ्करशीकरेण मौग्ध्ये च तन्नागमुखम्भजामि ॥
तया समुद्धृत्य गजस्य हस्तं ये शीकराः पुष्कररन्ध्रमुक्ताः ।
व्योमाङ्गणे ते विचरन्ति तारा कालात्मना मौक्तिकतुल्यभासः ॥
क्रीडारते वारिनिधौ गजस्थे वेलामतिक्रामति वारिपूरे ।
कल्पावसानम्परिचिन्त्य देवाः कैलासनाथं श्रुतिभिः स्तुवन्ति ॥
नागानने नागकृतोत्तरीये क्रीडारते देवकुमारसंघैः ।
त्वयि क्षणङ्कालगतिंविहाय तौ प्रापतुः कन्दुकतामिनेन्दू ॥
मदोल्लसत्पञ्चमुखैरजस्रमध्यापयन्तं सकलागमार्थम् ।
देवानृषीन्भक्तजनैकमित्रं हेरम्बमर्क्कारुणमाश्रयामि ॥
पादाम्बुजाभ्यामतिवामनाभ्याङ्कृतार्थयन्तङ्कृपया धरित्रीम् ।
अकारणङ्कारणमाप्तवाचान्तन्नागवक्त्रन्न जहाति चेतः ॥
येनार्पितं सत्यवतीसुताय पुराणमालिख्य विषाणकोट्या ।
तच्चन्द्रमौलेस्तनयन्तपोभिराराध्यमानन्दघनम्भजामि ॥
पदं श्रुतीनामपदं स्तुतीनाँल्लीलावतारम्परमात्मभूतेः ।
नागात्मकंव्वा पुरुषात्मकंव्वा त्वमेवमाद्यं भज विघ्नराजम् ॥
पाशाङ्कुशाभग्नरदन्त्वभीष्टङ्करैर्दधानङ्कररन्ध्रमुक्तैः ।
सिञ्चन्तमङ्गं शिवयोर्भजामि सिञ्चन्तमङ्गं शिवयोर्भजामि ॥
मुक्ताफलाभैः पृथुशीकरौघैरनेकमेकञ्जमेकदन्तम्
ब्रह्मेति यं व्वेदविदो वदन्ति तं शंभुसूनुं सततम्भजामि ॥
स्वाङ्कस्थिताया निजवल्लभाया मुखाम्बुजालोकनलोलनेत्रम् ।
स्मेराननाब्जम्मदवैभवेन रुद्धम्भजे विश्वविमोहनन्तम् ॥
ये पूर्व्वमाराध्य गजाननन्त्वां
सर्व्वाणि शास्त्राणि पठन्ति तेषाम् ।
त्वत्तो नचान्यत्प्रतिपाद्यमेतै-
स्तदस्ति चेत्सर्व्वमसत्यकल्पम् ॥
हिरण्यवर्णञ्जगदीशितार-
ङ्कविम्पुराणं रविमण्डलस्थम् ।
गजाननं य्यम्प्रविशन्ति सन्त-

स्तत्कालयोगैस्तमहम्प्रपद्ये ।।
वेदांतगीतम्पुरुषम्भजेह-
मात्मानमानन्दघनं हृदिस्थम् ।
गजाननंय्यन्महसा जनानां
व्विघ्नांधकारो विलयम्प्रयाति ।।
शम्भोस्समालोक्य जटाकलापे
शशाङ्कखण्डन्निजपुष्करेण ।
सुभग्नदन्तं प्रविचिन्त्य मौग्ध्या-
दाक्रष्टुकामः श्रियमातनोतु ।।
विघ्नार्गलानांव्विनिपातनार्थं
यं नारिकेलैः कदलीफलाद्यैः ।
प्रसारयन्तम्मदवारणास्य-
म्प्रभुं सदाभीष्टप्रदम्भजेयम् ।।
यज्ञैरनेकैर्ब्बहुभिस्तपोभि-
राराध्यमाद्यङ्गजराजवक्त्रम् ।
स्तुत्यानया ये विधिवत्स्तुवन्ति
ते सर्व्वलक्ष्मीनिलया भवन्ति ।।

गणेशकवच —

विश्वसारतन्त्र में उल्लिखित गणेश कवच इस प्रकार है। यह कवच समस्त सम्पत्तियों को देने वाला, समस्त रिपुओं का दमन करने वाला तथा ग्रह पीड़ा, ज्वर, राग, बीमारी, गुह्यकादि दोषों को मिटाने वाला है। इसलिए गणेश जी के प्रत्येक साधक भक्त को इस कवच का प्रतिदिन पाठ करना चाहिए।

ईश्वर उवाच—

शृणु वक्ष्यामि कवचं सर्व्वसिद्धिकरम्प्रिये ।
पठित्वा पाठयित्वा च मुच्यते सर्व्वसङ्कटात् ।।
अज्ञात्वा कवचं देवि गणेशस्य मनुञ्जपेत् ।
सिद्धिर्न जायते तस्य कलाकोटिशतैरपि ।।

ओं आमोदश्शिरः पातु प्रमोदश्च शिखोपरि ।
सम्मोदो भ्रूयुगे पातु भ्रूमध्ये च गणाधिपः ।।
गणक्रीडश्चक्षुर्य्युगन्नासायाङ्गणनायकः ।
गणक्रीडाचितः पातु वदने सर्व्वसिद्धये ।।
जिह्वायां सुमुखः पातु ग्रीवायान्दुर्म्मुखः सदा ।
विघ्नेशो हृदये पातु विघ्ननाशश्च वक्षसि ।।
गणानान्नायकः पातु बाहुयुग्मे सदा मम ।
विघ्नकर्त्ता च उदरे विघ्नहर्त्ता च लिङ्गके ।।
गजवक्त्रः कटिदेशे एकदन्तो नितम्बके ।
लम्बोदरः सदा पातु गुह्यदेशे ममारुणः ।।
व्यालयज्ञोपवीती माम्पातु पादयुगे सदा ।
जापकः सर्व्वदा पातु जानुजंघे गणाधिपः ।।
हरिद्रः सर्व्वदा पातु सर्व्वाङ्गे गणनायकः ।
य इदम्प्रपठेन्नित्यं गणेशस्य महेश्वरि ।।
कवचं सर्व्वसिद्धाख्यं सर्व्वविघ्नविनाशनम् ।
सर्व्वसिद्धिकरं साक्षात् सर्व्वपापविमोचनम् ।।
सर्व्वसम्पत्प्रदं साक्षात्सर्वशत्रुक्षयङ्करम् ।
ग्रहपीडा ज्वरा रोगा ये चान्ये गुह्यकादयः ।।
पठनाद्धारणादेव नाशमायान्ति तत्क्षणम् ।
धनधान्यकरन्देवि कवचं सुरपूजितम् ।।
समो नास्ति महेशानि त्रैलोक्ये कवचस्य च ।
हरिद्रस्य महेशानि कवचस्य च भूतले ।
किमन्यैरक्षदालापैर्य्यंत्रायुर्व्यर्थतामियात् ।।

इति श्रीगणेशकवचं सम्पूर्णम् ।

गणपतिस्तुतिः

गाइये गणपति जग वन्दन

शंकर सुमन भवानी के नन्दन ।

सिद्ध सदन गज बदन बिनायक

कृपासिन्धु सुन्दर सब लायक ॥

मोदकप्रिय मुदमंगलदाता

विद्यावारिधि बुद्धिविधाता ॥

मांगत तुलसीदास कर जोरे

बसहुं राम सिय मानस मोरे ॥

4

शिव साधना

* यहाँ हम शिवसाधना के मन्त्र, यन्त्र, पूजाविधि, स्तोत्र, कवच इत्यादि को प्रस्तुत कर रहे हैं।

सर्वप्रथम शिव साधन का मूल मंत्र—

"ओं नमश्शिवाय ।"

शिव पूजन यंत्र—

निम्नलिखित यन्त्र (देखिये पृ० 46) को अष्टगन्ध द्वारा भोजपत्र पर लिख कर शिवजी का पूजन-साधन करना चाहिए ।

प्रातः कृत्यादि करके पूजा-स्थान में जाकर आसन पर विराजमान होकर दीपक प्रज्ज्वलित करना चाहिए। "ओं दीं दीपनाथाय नमः" इस मन्त्र का उच्चारण करके दीपक का पूजन करना चाहिए। भूतापसर्पण करना चाहिए। तत्पश्चात् पूजा प्रारंभ करनी चाहिए।

शिवध्यान-मंत्र—

"बन्धूकसन्निभन्देवन्त्रिनेत्रचन्द्रशेखरम् ।
त्रिशूलधारिणन्देवञ्चारुहासं सुनिर्म्मलम् ।
कपालधारिणन्देवं वरदाभयहस्तकम् ।
उमया सहितं शम्भुन्ध्यायेत्सोमेश्वरं सदा ॥"

उपरोक्त मन्त्र से ध्यान करके निम्नलिखित मन्त्र द्वारा आवाहन करना चाहिए।

आवाहन-मंत्र—

"आयाहि भगवञ्छम्भो शर्व्व त्वङ्गिरिजापते ।
प्रसन्नो भव देवेश नमस्तुभ्यं हि शंकर ॥

अब निम्नलिखित मन्त्र द्वारा आसन प्रदान करना चाहिए—

आसन-मंत्र—


"विश्वेश्वर महादेव राजराजेश्वरप्रिय ।
आसनन्दिव्यमीशान दास्येऽहन्तुभ्यमीश्वर ॥"

इसके पश्चात् निम्नलिखित मन्त्र द्वारा अर्घ्य प्रदान करे—

अर्घ्य-मन्त्र—

"त्र्यम्बकेशसदाचार जगदादिविधायक ।
अर्घ्यं गृहाण देवेश साम्ब सर्व्वार्थदायक ॥"

इसके पश्चात् 'आचमनीय' प्रदान करना चाहिए । उसके लिए मन्त्र निम्न लिखित है । (देखो पृ० 45)



आचमनीय मंत्र—

"त्रिपुरान्तक दीनार्त्ति हर श्रीकण्ठ शाश्वत ।
गृहाणाचमनीयञ्च पवित्रोदकमर्पितम् ॥"

तत्पश्चात् गोदुग्धस्नान कराना चाहिए । इसके लिए इस मन्त्र का उच्चारण करे—

गोदुग्धस्नान मंत्र—

"मधुरं गोपयः पुण्यम्पटपूतम्पुरस्कृतम्
स्नानार्थन्देवदेवेश गृहाण परमेश्वर ॥"

गो-दुग्ध स्नान करने के पश्चात् निम्नलिखित मन्त्र द्वारा दधिस्नान कराये—

दधिस्नानमंत्र—

"दुर्ल्लभन्दिवि सुस्वादु दधि सर्व्वप्रियम्परम् ।
पुष्टिदम्पार्व्वतीनाथ स्नानाय प्रतिगृह्यताम् ॥"

दधि स्नान कराकर निम्नलिखित मन्त्र द्वारा 'घृतस्नान' कराये :—

घृतस्नान मंत्र—

"घृतगव्यं शुचिस्निग्धं सुसेव्यम्पुष्टिमिच्छताम् ।
गृहाण गिरिजानाथ स्नानाय चन्द्रशेखर ॥"

घृत स्नान के पश्चात् निम्नलिखित मन्त्र द्वारा मधु-स्नान कराये—

मधुस्नान मंत्र—

"मधुरम्मृदु मोहघ्नं स्वरभंगविनाशनम् ।
महादेवेदमुत्सृष्टन्तव स्नानाय शंकर ॥"

तत्पश्चात् निम्नलिखित मन्त्र द्वारा शर्क्करास्नान करायें—

शर्क्करास्नान मंत्र—

"तापशान्तिकरी शीता मधुरा स्वादसंयुता ।
स्नानार्थन्देवदेवेश शर्क्करेयम्प्रदीयते ॥"

इसके पश्चात् निम्नलिखित मन्त्र द्वारा शुद्धोदक स्नान कराये ।

शुद्धोदक स्नान मंत्र—

"गंगा गोदावरी रेवा पयोष्णी यमुना तथा ।
सरस्वत्यादितीर्थानि स्नानार्थम्प्रतिगृह्यताम् ॥"

इस प्रकार शुद्धोदक स्नान कराकर निम्नलिखित 900 मन्त्रों द्वारा 'शतरुद्री स्नान' कराना चाहिये ।

शतरुद्री स्नान मंत्र—

शतरुद्री स्नान का मंत्रोद्धार—

"नमस्ते रुद्रसूक्तञ्च पुनः षोडशमेव च ।
एष ते द्विर्न्नमस्तेद्विर्न्नतावद्वयमेव च ।
मोढुष्टमष्ट चत्वारि वचक्ष्वमष्टमञ्जपेत् ॥"

स्नान मंत्र इस प्रकार हैं :—

"ओं नमस्ते रुद्र मन्यवऽउतोत इषवे नमः बाहुभ्यामुत ते नमः ॥ १ ॥
या ते रुद्र शिवा तनूरघोरापापकाशिनी ।
तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि ॥ २ ॥
या मिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे ।
शिवांगिरित्र ताङ् कुरु माहि ठं सीः पुरुषञ्जगत् ॥ ३ ॥
शिवेनव्वचसा त्वा गिरिशाच्छाव्वदामसि ।
यथा नः सर्व्वमिज्जगदयक्ष्म ठं. सुमनाऽअसत् ॥ ४ ॥
अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहींश्च सर्व्वाञ्जम्भयन्त्सर्व्वांश्च यातुधान्योधराचीः परासुव ॥ ५ ॥
असौ यस्ताम्रोऽअरुणऽउत बभ्रुः सुमंगलः ।
ये चैन ठं रुद्रा अभितो दिक्षु श्रिताः सहस्रशो वैषां हेडऽईमहे ॥ ६ ॥
असौ योऽवसर्प्पति नीलग्रीवो विलोहितः ।
उतैनं गोपाऽअदृश्रन्नदृश्रन्नुदहार्य्यः स दृष्टोमृडयाति नः ॥ ७ ॥
नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो येऽअस्य सत्वानो हन्तेभ्योकरन्नमः ॥ ८ ॥
प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योंज्ज्यम् ।
याश्च ते हस्त इषवः पराताभगवोव्वप ॥ ९ ॥
विज्ज्यन्धनुः कपर्दिनो विशल्यो बाणवाँऽउत ।
अनेशन्नस्य याऽइषवऽआभुरस्य निषङ्गधिः ॥ १० ॥
या ते हेतिर्म्मीढुष्टम हस्ते बभूव ते धनुः ।

तयास्मान्विश्वतस्त्वमयक्ष्मया परि भुज । ११
परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ।
अथोयऽइषुधिस्तवारेऽअस्मन्नि धेहि तम् । १२
अवतत्य धनुष्ट्व ठं सहस्राक्ष शतेषुधे ।
निशीर्य्य शल्यानाम्मुखा शिवो नः सुमना भव । १३
नमस्तऽआयुधायानातताय धृष्णवे ।
उभाभ्यामुत ते नमो बाहुभ्यान्तव धन्वने । १४
मा नो महान्तमुत मा नोऽअर्भकम्मा नऽउक्षन्तमुत मा नऽउक्षितम् ।
मा नो व्वधीः पितरम्मोत मातरम्मा नः प्रियास्तन्वो रुद्र रीरिषः । १५
मा नस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः ।
मा नोव्वीरान् रुद्र भामिनो व्वधीर्हविष्मंतः सदमि त्वा हवामहे । १६
नमो हिरण्यबाहवे सेनान्ये दिशाञ्च पतये नमो नमो नमो वृक्षेभ्यो
हरिकेशेभ्यः पशूनाम्पतये नमो नमः शष्पिञ्जराय त्विषीमते
पथीनाम्पतये नमो नमो हरिकेशायोपवीतिने दुष्टानाम्पतये नमः । १७
नमोवम्लुशाय व्याधिनेऽन्नानाम्पतये नमो नमो भवस्य
हेत्यै जगताम्पतये नमो नमो रुद्रायाततायिने क्षेत्राणाम्पतये नमो नमः
सूतायाहन्त्यैव्वनानाम्पतये नमः । १८
नमो रोहिताय स्थपतये व्वृक्षाणाम्पतये नमो नमो भुवन्तयेव्वारिवस्कृतायौ-
षधीनाम्पतये नमो नमो मन्त्रिणेव्वाणिजाय कक्षाणाम्पतये नमो
नमऽउच्चैर्घोषायाक्रन्दयते पत्तीनाम्पतये नमः । १९
नमः कृत्स्नाय तयावते सत्वानाम्पतये नमो नमः सहमानाय
निव्याधिनेऽआव्याधिनीनाम्पतये नमो नमो निषङ्गिणे ककुभाय स्तेनाना-
म्पतये नमो नमो निचेरवे परिचरायारण्यानाम्पतये नमः । २०
नमो वञ्चते परिवञ्चते स्तायूनाम्पतये नमो नमो
निषङ्गिणेऽइषुधिमते तस्कराणाम्पतये नमो नमः सृकायिभ्यो जिघां-
सद्भ्यो मुष्णताम्पतये नमो नमो
ऽसिमद्भ्यो नक्तञ्चरद्भ्यो विकृन्तानाम्पतये नमः । २१
नमऽउष्णीषिणे गिरिचराय कुलुञ्चानाम्पतये नमो नमो ऽइषुमद्भ्यो धन्वा-

यिभ्यश्च वो नमो नमऽआतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नमऽआय-
च्छद्भ्योऽस्यद्भ्यश्च वो नमो नमः । २२
नमो विसृजद्भ्यो विद्ध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो
नमो नमः शयानेभ्यऽआसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च
वो नमो नमः । २३
नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमो
नमोऽ आव्याधिनीभ्यो विविद्ध्यन्तीभ्यश्च वो नमो नमो गणाभ्यस्तृ ठं
हतीभ्यश्च वो नमो नमः । २४
नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो
नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्योविश्वरूपेभ्य-
श्च वो नमो नमः । २५
नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमो रथिभ्योऽअरथेभ्यश्च वो नमो नमः
क्षतृभ्यः संग्रहीतृभ्यश्च वो नमो नमो महद्भ्योऽअर्भकेभ्यश्च वो नमः ।२६
नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्म्मारेभ्यश्च वो
नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च
वो नमो नमः । २७
नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमो नमः
शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च । २८
नमः कपर्द्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो
गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुधिमते च
नमो नमः । २९
नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो
वृद्धाय च संवृधे च नमोऽग्र्याय च प्रथमाय च । ३०
नमऽआशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय नमः ऊर्म्याय चोव-
स्वन्याय च नमो नादेयाय च द्वीप्याय च । ३१
नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्व्वजाय चापरजाय च नमो मध्यमाय
चापगल्भाय च नमो जघन्याय च बुद्ध्न्याय च । ३२
नमः सोभ्याय च प्रतिसर्प्याय च नमो याम्याय च क्षेम्याय च नमः
श्लोक्याय चावसान्याय च नमो वर्य्याय च खल्याय च । ३३

[illegible]न्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च
[illegible]आशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च । ३४
[illegible] बिल्मिने च कवचिने च नमोर्व्वर्म्मिणे च वरूथिने च नमः
[illegible] च श्रुतसेनाय च नमो दुन्दुभ्याय चाहनन्याय च । ३५
[illegible] धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च
[illegible]तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च ३६
[illegible] स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः
[illegible] च सरस्याय च नमो नादेयाय च वैशन्ताय च । ३७
[illegible] कूप्याय चावट्याय च नमोवीद्ध्याय चातप्याय च
[illegible] मेघ्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च । ३८
[illegible] वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय च नमः
[illegible] च रुद्राय च नमस्ताम्राय चारुणाय च । ३९
[illegible] शङ्गवे च पशुपतये च नमऽउग्राय च भीमाय च नमोऽग्रेवधाय च दूरेव-
[illegible] च नमो हंत्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय । ४०
[illegible] शम्भवाय च मयोभवाय च नमः शंकराय च मयस्कराय च
[illegible] शिवाय शिवतराय च । ४१
[illegible] पार्याय चावर्याय च नमः प्रतरणाय चोत्तरणाय च नमस्तीर्थ्याय
[illegible] कूल्याय च नमः शष्प्याय च फेन्याय च । ४२
[illegible] सिकत्याय च प्रवाह्याय च नमः किं ठं. शिलाय च क्षयणाय च नमः
कपर्द्दिने च पुलस्तये च नमऽइरिण्याय च प्रपथ्याय च । ४३
[illegible]व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च नमो हृदय्याय च
[illegible]वेष्याय च नमः काट्याय च गह्वरेष्ठाय च । ४४
[illegible] शुष्क्याय च हरित्याय नमो नमः पां ठं सव्याय च रजस्याय च
[illegible] लोप्याय चालोप्याय नमऽऊर्व्वर्याय सूर्म्याय च । ४५
[illegible] पर्ण्याय च पर्ण्णशदाय च नमऽउद्गुरमाणाय चाभिघ्नते च
[illegible]ऽआखिदते चप्रखिदते च नमऽइषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो
[illegible] वः किरिकेभ्यो देवानां ठं हृदयेभ्यो नमो विचिन्व-
[illegible]भ्यो नमो विक्षिणत्केभ्यो [illegible]ऽआनिर्हतेभ्यः । ४६

यिभ्यश्च वो नमो नमऽआतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नमऽआय-
च्छद्भ्योऽस्यद्भ्यश्च वो नमो नमः । २२
नमो विसृजद्भ्यो विद्ध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो
नमो नमः शयानेभ्यऽआसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च
वो नमो नमः । २३
नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो नमो
नमोऽ आव्याधिनीभ्यो विविद्ध्यन्तीभ्यश्च वो नमो नमो गणाभ्यस्तृ ठं
हतीभ्यश्च वो नमो नमः । २४
नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो
नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्योव्विश्वरूपेभ्य-
श्च वो नमो नमः । २५
नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमो रथिभ्योऽअरथेभ्यश्च वो नमो नमः
क्षतृभ्यः संग्रहीतृभ्यश्च वो नमो नमो महद्भ्योऽअर्भकेभ्यश्च वो नमः ।२६
नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्म्मारेभ्यश्च वो
नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च
वो नमो नमः । २७
नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमो नमः
शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च । २८
नमः कपर्द्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो
गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुधिमते च
नमो नमः । २९
नमो ह्रस्वाय च व्वामनाय च नमो बृहते च वर्षीयसे च नमो
वृद्धाय च संवृधे च नमोऽग्र्याय च प्रथमाय च । ३०
नमऽआशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय नमः ऊर्म्म्याय चोव-
स्वन्याय च नमो नादेयाय च द्वीप्याय च । ३१
नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्व्वजाय चापरजाय च नमो मध्यमाय
चापगल्भाय च नमो जघन्याय च बुद्ध्न्याय च । ३२
नमः सोभ्याय च प्रतिसर्प्याय च नमो याम्याय च क्षेम्याय च नमः
श्लोक्याय चावसान्याय च नमो वर्य्याय च खल्याय च । ३३

नमो व्वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च
नमऽआशुषेणाय चाशुरथाय च नमः सूराय चावभेदिने च । ३४
नमो बिल्मिने च कवचिने च नमोव्वर्म्मिणे च वरूथिने च नमः
श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चाहनन्याय च । ३५
नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च
नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च ३६
नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः
कुल्याय च सरस्याय च नमो नादेयाय च व्वैशन्ताय च । ३७
नमः कूप्याय चावट्याय च नमोवीद्ध्याय चातप्याय च
नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च । ३८
नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च व्वास्तुपाय च नमः
सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च । ३९
नमः शङ्गवे च पशुपतये च नमऽउग्राय च भीमाय च नमोऽग्रेवधाय च दूरेव-
धाय च नमो हंत्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय । ४०
नमः शम्भवाय च मयोभवाय च नमः शंकराय च मयस्कराय च
नमः शिवाय शिवतराय च । ४१
नमः पार्याय चावर्याय च नमः प्रतरणाय चोत्तरणाय च नमस्तीर्थ्याय
च कूल्याय च नमः शष्प्याय च फेन्याय च । ४२
नमः सिकत्याय च प्रवाह्याय च नमः कि ठं. शिलाय च क्षयणाय च नमः
कपर्द्दिने च पुलस्तये च नमऽइरिण्याय च प्रपथ्याय च । ४३
नमोव्व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च नमो हृदय्याय च
निवेष्प्याय च नमः काट्याय च गह्वरेष्ठाय च । ४४
नमः शुष्क्याय च हरित्याय नमो नमः पा ठं सव्याय च रजस्याय च
नमो लोप्याय चालोप्याय नमऽऊर्व्वर्याय सूर्व्याय च । ४५
नमः पर्ण्णाय च पर्ण्णशदाय च नमऽउद्गुरमाणाय चाभिघ्नते च
नमोऽआखिदते च प्रखिदते च नमऽइषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो
नमो वः किरिकेभ्यो देवाना ठं हृदयेभ्यो नमो विचिन्व-
त्केभ्यो नमो विक्षिणत्केभ्यो ऽआनिर्हतेभ्यः । ४६

द्रापेऽअन्धसस्पते दरिद्र नीललोहित ! आसाम्प्रजानामेषा-
म्पशूनाम्माभेर्म्मारोङ्म्मो च नः किंचनाममत् । ४७
इमा रुद्राय तवसे कपर्द्दिने क्षयद्वीरायप्र भरामहे मतीः ।
यथा शमसद्द्विपदे चतुष्पदे विश्वम्पुष्टङ् ग्रामेऽअस्मिन्ननातुरम् । ४८
या ते रुद्र शिवा तनू· शिवा विश्वाहा भेषजी ।
शिवारुतस्य भेषजी तया नो मृड जीवसे । ४९
परि नो रुद्रस्य हेतिर्व्वृणक्तु परि त्वेषस्य दुर्म्मतिरघायोः ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड । ५०
मीढुष्टम शिवतम शिवो नः सुमना भव । परमे वृक्षऽआयु-
धन्निधाय कृत्तिव्वसानऽआ चर पिनाकम्बिभ्रदागहि । ५१
विकिरिद्र विलोहित नमस्तेऽस्तु भगवः । यास्ते सहस्र
ठं हेतयोऽन्यमस्मन्निवपन्तु ताः । ५२
सहस्राणि सहस्रशो बाह्वोस्तव हेतयः । तासामीशानो भगवः
पराचीना मुखा कृधि । ५३
असङ्ख्याताः सहस्राणि ये रुद्राऽअधिभूम्याम् ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि । ५४
अस्मिन्महत्यर्णवेऽन्तरिक्षे भवाऽअधि ।
तेषा ठं सहस्रयोजनेऽव धन्वानि तन्मसि । ५५
नीलग्रीवा शितिकण्ठा दिव ठं रुद्रा उपश्रिताः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि । ५६
नीलग्रीवा शितिकण्ठाः शर्व्वाऽअधः क्षमाचराः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि । ५७
ये भूतानामधिपतयो विशिखासः कपर्द्दिनः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि । ५८
ये वृक्षेषु शष्पिञ्जरा नीलग्रीवाव्विलोहिताः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि । ५९
ये पथाम्पथिरक्षयऽएलबृदा आयुर्युधः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि । ६०

ये तीर्थानि प्रचरन्ति सृका हस्ता निषङ्गिणः ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि । ६१
येऽन्नेषु विविद्ध्यन्ति पात्रेषु पिबतो जनान् ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि । ६२
यऽएतावन्तश्च भूया ठं सश्च दिशो रुद्रा व्वितस्थिरे ।
तेषां सहस्रयोजनेऽव धन्वानि तन्मसि । ६३
नमोस्तु रुद्रेभ्यो ये दिवि येषाँव्वर्षमिषवः ।
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः ।
तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो
यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः । ६४
नमोस्तु रुद्रेभ्यो येऽअन्तरिक्षे येषाँव्वातऽइषवस्तेभ्यो दश
प्राचीर्दश दक्षिणा दशप्रतीचीर्दशोदीचीर्दशोर्ध्वाः
तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो
यश्च नो द्वेष्टि तमेषां जम्भे दध्मः । ६५
नमोऽस्तु रुद्रेभ्यो ये पृथिव्यांय्येषामन्नमिषवः तेभ्यो दश
प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः ।
तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडन्तु ते यं द्विष्मो
यश्च नो द्वेष्टि तमेषां जम्भे दध्मः । ६६
नमस्ते रुद्र मन्यवऽउतोतऽइषवे नमः ।
बाहुभ्यामुत ते नमः । ६७
या ते रुद्र शिवा तनूरघोरा पापकाशिनी ।
तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि । ६८
यामिषुङ्गिरिशन्तहस्ते बिभर्ष्यस्तवे ।
शिवांगिरित्रता ङ् कुरु मा हि ठं सीः पुरुषञ्जगत् । ६९
शिवेनव्वचसा त्वा गिरिशाच्छाव्वदामसि ।
यथा नः सर्व्वमिज्जगदयक्ष्म ठं सुमनाऽअसत् । ७०
अध्यवोचदधिवक्ता प्प्रथमो दैव्यो भिषक् ।
अहींश्च सर्व्वाञ्जम्भयन्तसर्व्वाश्च यातुधान्योऽधराची: परासुव । ७१

असौ यीव सर्प्पति नीलग्रीवोव्विलोहितः
उतैनङ्गोपाऽअदृश्रन्नदृश्रन्नुदहार्य्यः स दृष्टो मृडयाति नः । ७२
असौ यस्ताम्रोऽअरुणऽउत बभ्रुः सुमंगलः ।
ये चैन ठं रुद्राऽअभितो दिक्षु श्रिताः सहस्रशो वैषाः हेडऽईमहे । ७३
नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो येऽअस्य सत्वानोऽहस्तेभ्योकरन्नमः । ७४
प्रमुञ्च धन्वनस्त्वमुभयोरात्त्न्योर्ज्ज्याम् ।
याश्च ते हस्तऽइषवः परा ता भगवोव्वप । ७५
विज्यन्धनुः कपर्द्दिनोव्विशल्यो बाणवांउत ।
अनेशन्नस्य याऽइषवऽआभुरस्य निषङ्गधिः । ७६
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ।
तयाऽस्मान्विश्वतस्त्वमयक्ष्मया परि भुज । ७७
परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ।
अथो यऽइषुधिस्तवारेऽअस्मन्नि धेहि तम् । ७८
अवतत्य धनुष्ट्व ठं. सहस्राक्ष शतेषुधे ।
निशीर्य्य शल्यानाम्मुखा शिवो नः सुमना भव । ७९
नमस्तेऽआयुधायानातताय धृष्णवे ।
उभाभ्यामुत ते नमो बाहुभ्यान्तव धन्वने । ८०
मा नो महान्तमुत मा नोऽअर्भकम्मा न ऽउक्षन्तमुत मा न ऽउक्षितम्
मा नोव्वधीः पितरम्मोत मातरम्मा नः प्रियास्तन्वो रुद्र रीरिषः । ८१
मा नस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः ।
मा नोव्वीरान्रुद्र भामिनोव्वधीर्हविष्मन्तः सदमित्त्वा हवामहे । ८२
एष ते रुद्र भागः स्वस्राम्बिकया तं जुषस्व स्वाहैष ते-
रुद्र भागऽआखुस्ते पशुः । ८३
अव रुद्र मदीमह्यव देवं त्र्यम्बकम् ।
यथा नो व्यस्यसस्करद्यथा नः श्रेयसस्करद्यथा नो व्यवसाययात् ८४
नमस्ते हरसे शोचिषे नमस्तेऽअस्त्वर्चिषे ।
अन्याँस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्य ठं शिवो भव । ८५

नमस्तेऽअस्तु विद्युते नमस्ते स्तनयित्नवे ।
नमस्ते भगवन्नस्तु यतः स्वः समीहसे । ८६
न तँव्विदाथ यऽइमा जजानान्यद्युष्माकमन्तरम्बभूव ।
नीहारेण आवृता जल्प्या चासुतृप उक्थशासश्चरन्ति । ८७
विश्वकर्म्मा ह्यजनिष्ट देव आदिगन्धर्व्वोऽअभवद्द्वितीयः ।
तृतीयः पिता जनितौषधीनामपां गर्भव्व्यदधात्पुरुत्रा । ८८
विकिरिद्रव्विलोहित नमस्तेऽअस्तु भगवः ।
यास्ते सहस्र ठं. हेतयोन्यमस्मन्नि वपन्तु ताः । ८९
मीढुष्टम शिवतम शिवो न सुमना भव ।
परमेव्वृक्ष आयुधन्निधाय कृत्तिव्वसानऽआचर पिनाकम्बिभ्रदागहि । ९०
सहस्राणि सहस्रशो बाह्वोस्तव हेतयः ।
तासामीशानो भगवः पराचीना मुखा कृधि । ९१
असङ्ख्याताः सहस्राणि ये रुद्राऽअधिभूम्याम् ।
तेषा सहस्रयोजने व धन्वानि तन्मसि । ९२
वय ठंः सोम व्रते तव मनस्तनूषु बिभ्रतः ।
प्रजावन्तः सचेमहि ९३
एष ते रुद्र भागः सह स्वस्राम्बिकया तं जुषस्व स्वाहैष ते ।
रुद्र भागऽआखुस्ते पशुः ९४
अव रुद्र मदीमह्यव देवन्त्र्यम्बकम् ।
यथा नो वयस्करद्यथा नः श्रेयसस्करद्यथा नो व्यवसाययात् । ९५
भेषजमसि भेषजं गवेश्वाय पुरुषाय भेषजम् ।
सुखम्मेषाय मेष्यै । ९६
त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्द्धनम् ।
उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् । ९७
त्र्यम्बकं यजामहे सुगन्धिम्पतिवेदनम् ।
उर्व्वारुकमिव बन्धनादितो मुक्षीय मामुतः ।
एतत्ते रुद्रावसन्तेन पुरो मूजवतोऽतीहि । ९८

त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् ।
यद्देवेषु त्र्यायुषन्तन्नोऽअस्तु त्र्यायुषम् । ९९
शिवो नामासि स्वधितिस्ते पिता नमस्तेऽअस्तु मा मा हि ७ सी
नि वर्त्तयाम्यायुषेन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय
सुवीर्य्याय । १००

उपर्युक्त मन्त्रों द्वारा शुद्धोदक स्नान कराने के पश्चात् निम्नलिखित मन्त्र द्वारा वस्त्र प्रदान करे ।

वस्त्र मन्त्र—

"वस्त्राणि पट्टकूलानि विचित्राणि नवानि च ।
मया नीतानि देवेश प्रसन्नो भव शंकर ॥"

इसके उपरान्त निम्नलिखित मन्त्र द्वारा उपवीत प्रदान करे ।

उपवीत मन्त्र—

"सौवर्णं राजतन्ताम्रङ्कार्प्पासस्य तथैव च ।
उपवीतम्मया दत्तं प्रीत्यर्थम्प्रतिगृह्यताम् ॥"

इस मन्त्र के उपरान्त निम्नलिखित मंत्र द्वारा 'गन्ध' प्रदान करे ।

गन्ध मन्त्र—

"सर्व्वेश्वर जगद्वन्द्य दिव्यासनसमास्थित ।
गन्धङ्गृहाण देवेश चन्दनम्प्रतिगृह्यताम् ॥"

इस मंत्र के पश्चात् निम्नलिखित मन्त्र द्वारा 'अक्षत' प्रदान करे ।

अक्षत मन्त्र—

"अक्षताश्च सुरश्रेष्ठाः शुभ्रा पूताश्च निर्म्मलाः ।
मया निवेदिता भक्त्या गृहाण परमेश्वर ॥"

इस मन्त्र द्वारा अक्षत देकर निम्नलिखित मन्त्र द्वारा पुष्प प्रदान करे ।

पुष्प मन्त्र—

